# ભક્તિવર્ધિની

bhaktivardhinI

sanskritdocuments.org

March 17, 2018

# bhaktivardhinI

# ભક્તિવર્ધિની

## Sanskrit Document Information

Text title : bhaktivardhinI

File name : bhaktivardhinI.itx

Category : misc, puShTimArgIya, vallabhaachaarya, advice

Location : doc_z_misc_general

Author : vallabhAchArya

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : puShTimArgIya stotraratnAkara

Latest update : February 28, 2018

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

March 17, 2018

*sanskritdocuments.org*

# ભક્તિવર્ધિની

યથા ભક્તિઃ પ્રવૃદ્ધા સ્યાત્તથોપાયો નિરૂપ્યતે ।
બીજભાવે દૃઢે તુ સ્યાત્ત્યાગાચ્છ્રવણકીર્તનાત્ ॥ ૧॥

બીજદાર્ઢ્યપ્રકારસ્તુ ગૃહે સ્થિત્વા સ્વધર્મતઃ ।
અવ્યાવૃત્તો ભજેત્કૃષ્ણં પૂજયા શ્રવણાદિભિઃ ॥ ૨॥

વ્યાવૃત્તોઽપિ હરૌ ચિત્તં શ્રવણાદૌ યતેત્સદા ।
તતઃ પ્રેમ તથાઽઽસક્તિર્વ્યસનં ચ યદા ભવેત્ ॥ ૩॥

બીજં તદુચ્યતે શાસ્ત્રે દૃઢં યન્નાપિ નશ્યતિ ।
સ્નેહાદ્રાગવિનાશઃ સ્યાદાસક્ત્યા સ્યાદ્ગૃહારુચિઃ ॥ ૪॥

ગૃહસ્થાનાં બાધકત્વમનાત્મત્વં ચ ભાસતે ।
યદા સ્યાદ્વ્યસનં કૃષ્ણે કૃતાર્થઃ સ્યાત્તદૈવ હિ ॥ ૫॥

તાદૃશસ્યાપિ સતતં ગૃહસ્થાનં વિનાશકમ્ ।
ત્યાગં કૃત્વા યતેદ્યસ્તુ તદર્થાર્થૈકમાનસઃ ॥ ૬॥

લભતે સુદૃઢાં ભક્તિં સર્વતોઽપ્યધિકાં પરામ્ ।
ત્યાગે બાધકભૂયસ્ત્વં દુઃસંસર્ગાત્તથાઽન્નતઃ ॥ ૭॥

અતઃ સ્થેયં હરિસ્થાને તદીયૈઃ સહ તત્પરૈઃ ।
અદૂરે પિપ્રકર્ષે વા યથા ચિત્તં ન દુષ્યતિ ॥ ૮॥

સેવાયાં વા કથાયાં વા યસ્યાસક્તિર્દૃઢા ભવેત્ ।
યાવજ્જીવં તસ્ય નાશો ન ક્વાપીતિ મતિર્મમ ॥ ૯॥

બાધસમ્ભાવનાયં તુ નૈકાન્તે વાસ ઇષ્યતે ।
હરિસ્તુ સર્વતો રક્ષાં કરિષ્યતિ ન સંશયઃ ॥ ૧૦॥

ઇત્યેવં ભગવચ્છાસ્ત્રં ગૂઢતત્ત્વં નિરૂપિતમ્ ।
ય એતત્સમધીયીત તસ્યાપિ સ્યાદ્દૃઢા રતિઃ ॥ ૧૧॥

ઇતિ શ્રીવલ્લભાચાર્યવિરચિતા ભક્તિવર્ધિની સમાપ્તા ।

Proofread by PSA Easwaran psaeaswaran at gmail.com

---

*bhaktivardhinI*

pdf was typeset on March 17, 2018

Please send corrections to *sanskrit@cheerful.com*